# ॥ श्री सङ्कटनाशन गणेश स्तोत्रम् ॥

नारद उवाच
प्रणम्य शिरसा देवंगौरीपुत्रं विनायकम्।
भक्तावासं स्मेरनित्यमायुःकामार्थसिद्धये ॥ १॥

प्रथमं वक्रतुण्डं चएकदन्तं द्वितीयकम्।
तृतीयं कृष्णपिङ्गाक्षंगजवक्त्रं चतुर्थकम् ॥ २॥

लम्बोदरं पञ्चमं चषष्ठं विकटमेव च।
सप्तमं विघ्नराजं चधूम्रवर्णं तथाष्टकम् ॥ ३॥

नवमं भालचन्द्रं चदशमं तु विनायकम।
एकादशं गणपतिंद्वादशं तु गजाननम ॥ ४॥

द्वादशैतानि नामानित्रिसन्ध्यं यः पठेन्नरः।
न च विघ्नभयं तस्यसर्वासिद्धिकरं प्रभो ॥ ५॥

विद्यार्थी लभते विद्यांधनार्थी लभते धनम्।
पुत्रार्थी लभतेपुत्रान्मोक्षार्थी लभते गतिम् ॥ ६॥

जपेद्गणपतिस्तोत्रंषड्भिर्मासैः फलं लभेत्।
संवत्सरेण सिद्धिं चलभते नात्र संशयः ॥ ७॥

अष्टभ्यो ब्राह्मणेभ्यश्चलिखित्वां यः समर्पयेत्।
तस्य विद्या भवेत्सर्वागणेशस्य प्रसादतः ॥ ८॥
॥ इति श्रीनारदपुराणे सङ्कटनाशनगणेशस्तोत्रं सम्पूर्णम् ॥

वैदिक जीवन™
Sanatan Online Store
www.vaidikjeevn.com
Ver 1.0.0
7706011555
www.vaidikjeevn.com